
महर्षिदयानन्दचरितम् ।

Gurukula Library
Kangri
15760



कर्ता
वल्लभदास भगवानजी गणात्रा.

कर्ता अने प्रकाशक

वल्लभदास भगवानजी गणात्रा

c/o शेठ गोपालजी रामजी,

प्रताप बिल्डींग, घ्युभटवाडी, गीरगाम, मुंबई नं. ४.

COMPIL

CHECKED 1973

Initial

ग्रन्थमुद्रणनो अधिकार सर्वने छे.

प्रथमावृत्ति

इ. स. १९३१] प्रत १०००. [संवत् १९८८

मूल्य रु. ०-२-०.

मुद्रकः—
गिरिजाशंकर भगवानजी जोशी.
धि जोशी आर्ट प्रिंटींग वर्क्स.
८१, बझारगेट स्ट्रीट, फोर्ट, **मुंबई.**

આભારદર્શન અને નિવેદન.

ગયા ઑગસ્ટ માસમાં વડોદરા જવાનો પ્રસંગ મળતાં આર્ય કન્યામહાવિદ્યાલયની મુલાકાત લેવાનું ભાગ્ય મને પ્રાપ્ત થયું હતું. આર્યસમાજ અરેખર સમસ્ત વિશ્વને પ્રેરણારૂપ છે. આવી પ્રેરણામય સંસ્થા તરફથી ચાલતાં ઉપરોકત વિદ્યાલયની બ્રહ્મચારિણીઓનાં પવિત્ર જીવનનાં દર્શનથી મને સાવિત્રી અને સીતાનું સ્મરણ થયું. સંસ્કૃત ભાષામાં સંભાષણ કરતી એ દેવીઓએ મારા હૃદયકમલને વિકસિત કર્યું. મને એમ લાગ્યું કે આ દેવીઓજ સ્વરાજ્યની મૂર્તિઓ છે, આર્ય સંસ્કૃતિની જ્વાલાઓ છે અને રાષ્ટ્રવિધાત્રીઓ છે.

ગુરૂકુળના આચાર્ય **કવિરત્ન મેધાવ્રતજીની** મિત્રતા થઇ અને તેમની કેટલીક સુંદર સંસ્કૃત કૃતિઓ વાંચીને સંસ્કૃત સાહિત્યની સેવા માટેનો મારો અનુરાગ વધ્યો. બાદ ત્યાંની અને હેટોલા આર્યકન્યા વિદ્યાલયની અધ્યાપિકા સંસ્કૃત વિશારદા સ્નાતિકા શ્રીમતી **શાન્તા દેવી**, શ્રીમતી **સાવિત્રીદેવી** અને શ્રીમતી **લક્ષ્મીદેવીના** પરિચય થયો. એમનું સંસ્કૃત સાહિત્ય અને વ્યાકરણનું જ્ઞાન જોઇ મને એ બ્હેનો તરફ પૂજ્યભાવ અને માનવૃત્તિ ઉત્પન્ન થઇ.

લોહાણા જ્ઞાતિના મારા સંસ્કારી આર્યબંધુ શ્રીયુત ગાંગજી પીતાંબર વર્માની તેઓ સુપુત્રીઓ છે એ જાણી મને અતિ હર્ષ થયો. મારી લોહાણા જ્ઞાતિમાં પણ પંજાબ યુનીવર્સીટીની સંસ્કૃત ભાષાની વિશારદા જેવી ઉચ્ચ પદવી પામેલી અને જલન્ધર કન્યા-ગુરૂકુળની સ્નાતિકા થએલી આવી બ્હેનો છે એ માટે મને ગર્વ થયો.

આર્ય સંસ્કૃતિની મૂર્તિસમી એ દેવીઓએજ મને સ્વામીજીનું જીવન-ચરિત્ર સંસ્કૃતમાં લખવાની પ્રેરણા આપી છે. તે માટે એમનો હું આભારી છું.

સ્વામીજીનું જીવનચરિત્ર લખવાનો ઉદ્દેશ કેવળ સંસ્કૃત ભાષાનો પ્રચાર કરવો એ છે. કોઇપણ ગુરૂકુળો, પાઠશાળાઓ, હાઇસ્કૂલો કે ઇતર વિદ્યાલયો તથા પુસ્તકાલયોને આ પુસ્તક ભેટ આપવામાં આવશે. બહારગામથી મંગાવનારે એક આનાની ટીકીટ મોકલવી. કોઇપણ આર્ય બન્ધુને આ પુસ્તક પ્રચાર માટે છપાવવાનો હું હક્ક આપું છું.

આ કૃતિના પ્રચાર માટે કેટલીક સૂચના આપનાર શેઠ શ્રી વલ્લભજી રામજી, શ્રીયુત પ્રધાન હંસરાજ તન્ના, ભાઇશ્રી કરસનદાસ હીરજી પંજવાણી, અને લોહાણા ભક્તરત્ન રામજી જયરામ ખાન્ટનો આભાર માનું છું.

કર્તા

વલ્લભદાસ ભગવાનજી ગણાત્રા.

મુંબઇ, તા. ૧૮–૧૨–૩૧



શ્રીમતી રતનબેન વીરજી મેઁશરી

(મૃત્યુ. ૩૧ મે ૧૯૩૧. જ્યેષ્ઠ પૂર્ણિમા સંવત્ ૧૯૮૭)

મુલુન્ડ (થાણા જીલ્લો) મુંબઇ.

अर्पणपत्रिका.

સંસ્કૃતભાષા માટે જેનામાં અપાર પ્રેમ હતો, રાષ્ટ્રસેવા માટે જેનામાં ઉત્સાહની ઉર્મિઓ ઉછળતી હતી, સમાજની ઉન્નતિઅર્થે જીવનસમર્પણ કરવામાં જેમનું મન આનન્દ માનતું હતું, નારીજાતિની સ્વતંત્રતા વિના દેશની સ્વતંત્રતા દુર્લભ છે એમ જાણી જેમણે મહિલાઉદ્ધારપ્રવૃત્તિને પોતાનું જીવનધ્યેય બનાવ્યું હતું, અને વિદ્યામૃતવૃષ્ટિ કરી જેમણે મુલુન્ડ-ગામમાં જાગૃતિ ઉત્પન્ન કરી હતી એવી દેશસેવિકા, આદર્શગૃહિણી **વીરાંગના શ્રીમતી રતનબેન વીરજી મૈશેરી**ના પવિત્ર આત્માને સ્મરણાંજલિ તરીકે **મહર્ષિ દયાનન્દ ચરિત** નામે આ લઘુ પુસ્તક ભાવપૂર્વક અર્પણ કરી કૃતાર્થ થાઉં છું.

ગ્રન્થકર્તા

વલ્લભદાસ ભગવાનજી ગણાત્રા.

॥ ओ ३ म् ॥

महर्षिदयानन्दाय श्रद्धाञ्जलिः ।

शार्दूलविक्रीडितवृत्तम् ।

सौजन्यं पटुता दया विमलता गंभीरता वीरता
वाणी प्रेममयी विनोदभरिता निर्भीकता धीरता ।
एते हा सकला गुणास्तव निराधाराः प्रजाता इति
शोचामो नितरां गते त्वयि दयानन्दे यशश्शेषताम् ॥१॥

અર્થ:—હે સ્વામી દયાનન્દ સરસ્વતી, તમે પરમાત્માના ચરણારવિન્દને પ્રાપ્ત થયા તેથી તમારા "સૌજન્ય, કુશળતા, દયા, પવિત્રતા, ગંભીરતા, વીરતા, પ્રેમમય વિનોદાત્મક વાણી, નિર્ભયતા અને ધૈર્ય આદિ ગુણો નિરાધાર થઇ પડ્યા છે. એ ગુણોની આવી દશા માટે અમને ઘણો શોક થાય છે.

भीष्मस्तातमनःप्रसादजननेऽभूद् ब्रह्मचारी पर—
मासील्लोकहिताय भो यतिपते ते ब्रह्मचर्यव्रतम् ।
तस्माद् भीष्ममधःकरोषि सदृशः को ब्रह्मचारी तव
शोचामो नितरां गते त्वयि दयानन्दे यशश्शेषताम् ॥२॥

અર્થ:—હે સ્વામીજી, ભીષ્મપિતામહને તો પોતાના પિતાને પ્રસન્ન કરવાને બ્રહ્મચારી બનવું પડયું હતું. પણ તમારૂં

બ્રહ્મચર્યવ્રત તો લોકોપકાર માટે હતું. તેથી તમે ભીષ્મ-પિતામહથી સરસ છો. તમારા જેવો બ્રહ્મચારી કોણ છે! હે દયાનન્દ, તમારા અવસાનથી અમને ઘણો શોચ થાય છે.

लक्ष्मीस्त्वां समुपागता वरयितुं कृष्टा गुणैस्तावकैः
प्राप्य त्वत्त इवावधीरणमसौ स्थैर्यं न याति क्वचित् ।
कीर्तिश्चापि दिगन्तरं गतवती भीतेव ते तेजस
एवं सत्कविभिर्नुते त्वयि गते शोकोऽस्मदीयः परः ॥३॥

અર્થ:—તમારા ગુણોથી આકર્ષાઇને લક્ષ્મી તમને વરવા આવી પણ તમારી પાસેથી જાણે અવગણના પામીને કોઇ ઠેકાણે તે સ્થિરતાને પામતી નથી એમ લાગે છે. તમારી કીર્તિ પણ જાણે તમારા પ્રતાપથી ડરીને દિશાઓમાં ચાલી ગઇ હોય એમ જણાય છે. આ પ્રમાણે જેની સત્કવિઓ પ્રશંસા કરતા હતા એવા હે દયાનન્દ, તમારા અવસાનથી અમને ઘણો શોક થાય છે.

वाणी ते मधुरामृतेन भरिता प्राणा विनष्टाः कथं
तेजस्ते परमं निरीक्ष्य न कथं मृत्युर्गतो भस्मताम् ।
आ ज्ञातं वसति स्म सा त्वयि परा सद्ब्रह्मचर्यप्रभा
तत्तापादिव शुष्कतामुपगतं जीवप्रसूनं स्वयम् ॥४॥

અર્થ:—તમારી મધુર વાણી અમૃતથી ભરેલી હતી તો તમારા પ્રાણો કેમ નષ્ટ થયા! તમારું તેજ જોઇને મૃત્યુ ભસ્મ-સ્મસાત્ કેમ ન થયું!! (આવી તર્કપરંપરા પછી) અરે, હવે મને માલમ થયું કે તમારી અંદર નૈષ્ઠિક બ્રહ્મચર્યની અતુલ

પ્રભા દીપી રહી હતી તેના તાપથી જાણે તમારૂં જીવનરૂપી પુષ્પ પોતેજ કરમાઈ ગયું હોય એમ લાગે છે. (તમારા જેવા બ્રહ્મચારીના પ્રાણ લેવા માટે કોની તાકાત છે!)

कामाविष्टमना अभूद्विमकरस्त्वत्कीर्तिहंसीमसौ
दृष्ट्वा, तां स्वबलेन चित्तवशगां कर्तुं प्रयेते ततः ।
तद्देहे त्वरितं तया कुपितया चञ्चूप्रहारः कृतो
मन्ये धारयति व्रणं स मलिनं तस्मात्कलङ्कच्छलात् ॥५॥

અર્થ:—તમારી કીર્તિરૂપી હંસીને જોઇને ચંદ્રમા કામાતુર થયો અને તેને બળાત્કારે પોતાની મનોવૃત્તિને આધીન કરવા યત્ન કર્યો. તેથી તેણીએ સત્વર ચંદ્રમાને ચાંચ મારી. હું ધારૂં છું કે ચંદ્રમા કલંકરૂપે તમારી કીર્તિરૂપી હંસીએ કરેલા ઘાની નિશાનીને ધારણ કરી રહ્યો છે.

त्वत्सेवामकरोत्सदैव हुतभुक् काषायवस्त्रच्छलाद्
जिह्वाग्रे तव नर्तकीवदकरोल्लास्यं मुदा शारदा ।
शुश्रूषानिरताभवत्सुरनदी चारित्र्यरूपेण च
त्वत्तुल्यो नहि कोऽपि भूतलगतः शोकोऽस्मदीयस्ततः ॥६॥

અર્થ:—ભગવા વસ્ત્રરૂપે અગ્નિ હંમેશાં તમારી સેવા કરતો હતો, તમારી જીભ ઉપર શારદાદેવી સદા આનંદથી નર્તકીની માફક નૃત્ય કરતી હતી, તે ગંગાનદી ચારિત્ર્યરૂપે તમારી સેવા કરતી હતી. તમારા જેવો કોઇપણ પૃથ્વીપર નથી એટલે અમને શોક થાય છે.

मन्ये श्यामलतां गतं वियदपि त्वच्छोकदग्धं यतो
वर्षायां जलदस्य गर्जनमिषादाक्रन्दने व्यापृतम् ।
वृक्षाः पुष्पमिषेण नेत्रसलिलं मुञ्चन्ति धाराहताः
प्रातः कूजनकैतवेन रुदनं कुर्वन्ति सर्वे खगाः ॥७॥

અર્થ:—હું ધારું છું કે આકાશ પણ તમારા શોકથી શ્યામ થઈ ગયું છે કારણકે વર્ષાઋતુમાં વાદળાઓના ગર્જનારૂપે રૂદન કરે છે; વરસાદની ધારાઓના ઝપાટા લાગવાથી વૃક્ષો પુષ્પ-રૂપી આંસુ પાડે છે, અને પ્રાતઃકાળે પક્ષીઓ કલકલાટરૂપે રૂદન કરે છે.

राहोर्भीतिवशात्कदापि शशिनं नो चन्द्रिका मुञ्चति
तद्वच्चापि सुरप्रभा न सुरतो दूरं क्वचिद् गच्छति ।
त्वत्कीर्तिप्रमदा शुचिर्गतभया सर्वत्र गन्तुं क्षमा
वीराणां ललनास्तु भीतिरहिता इत्यत्र शंका कुतः ॥८॥

અર્થ:—રાહુના ભયથી જ્યોત્સ્ના પોતાના પતિ ચંદ્રમાને કદી છોડતી નથી. તેજ પ્રમાણે સૂર્યની કાન્તિ સૂર્યથી કદી દૂર જતી નથી, પણ તમારી કીર્તિરૂપી સ્ત્રી પવિત્ર અને ભય-રહિત છે તથા સર્વત્ર જવાને સમર્થ છે અર્થાત્ તેનો સ્પર્શ કરવાની કોઇની હિંમત ચાલતી નથી. વીરપુરૂષોની પત્નીઓ નિર્ભય હોય છે એમાં શંકા શું હોય!

देवानामपि मूर्तयो निजगृहाद् नो यान्ति शोकाद् बहिः
स्वादन्ते नहि भोजनं रसमयं प्रीत्यार्पितं पूजकैः ।

भाषन्ते वचनं न खेदभरिता ध्यायन्ति शोचन्ति च
दृष्ट्वेवात्र पुराणगौरवहरं वेदप्रचारं तव ॥ ९ ॥

અર્થ:—હે સ્વામી દયાનન્દ સરસ્વતી, મૂર્તિપૂજાપ્રતિપાદન કરનાર પુરાણોની મહત્તાને હરી લેનાર તમારો વેદપ્રચાર જોઇને જાણે શોકાતુર થઇ હોય એવી દેવોની મૂર્તિઓ મંદિરમાંથી બહાર જતી નથી, પૂજારીઓએ પ્રેમથી પીરસેલું રસમય ભોજન પણ લેતી નથી, કંઇ વાત કરતી નથી, ધ્યાન ધરે છે અને શોક કર્યા કરે છે એમ લાગે છે. (આગલા વખતમાં મૂર્તિઓ ચમત્કાર દર્શાવતી, વાતો કરતી એવી ભોળા લોકો વાત કરે છે. પણ વેદોનો પ્રચાર થયા પછી એ ગપગોળા બંધ થઇ ગયા છે.)

भक्ताः सन्ति सहस्रशो व्रतधरा भावेन युक्ता इह
दृष्टाः कैर्नहि मूषकाः शिवगृहे क्रीडापरा मानवैः ।
दिव्यप्रेरणया युतस्त्वमिव को जातो महीमंडले
त्वय्यासीत्करुणा प्रभोर्यतिदयानन्दात्र शंका नहि ॥१०॥

અર્થ:—આ જગતમાં હજારો ભાવિક ભક્તો છે. શંકરનાં મંદિરમાં ઉંદરોને રમતા કોણે નથી જોયા? પણ હે સ્વામી દયાનન્દ, તમારી માફક દિવ્ય પ્રેરણા કોને મળી છે? તમારા પર પરમાત્માની કૃપા હતી એમાં શંકા નથી.

वादिव्रातगजेन्द्रकेसरिवरः संन्यासिचूडामणि-
र्ज्ञानाम्भोजविकासवासरमणिः कारुण्यवारांनिधिः ।

विद्याकल्पलताप्रफुल्लकुसुमं वाग्देवतासंस्तुतो
यातः स्वर्गपथं भुवो यतिदयानन्दः शुचो भाजनम् ॥११॥

અર્થઃ—વાદીઓના સમૂહરૂપી ગજેન્દ્રોને કેસરીસમાન, સંન્યાસીના મુગટમણિ, જ્ઞાનરૂપી કમલનો વિકાસ કરનાર સૂર્યસમાન, દયાના સાગર, વિદ્યારૂપી કલ્પલતાના પ્રફુલ્લ પુષ્પ સમાન અને શારદાદેવીવડે સારી રીતે વખણાતા સ્વામી દયાનન્દ સરસ્વતી પૃથ્વીપરથી સ્વર્ગને માર્ગે ચાલતા થયા તેથી શોક થાય છે.

पाखण्डैकपरायणाश्च विषयासंगान्तरंगान्विता
वित्तोपार्जनतत्परा अगणिताः सन्त्यत्र संन्यासिनः ।
शुद्धःसत्यरतः क्षमी यमिवरो लोकोपकारी सुधीः
स्त्रीजात्युन्नतियत्नवांस्तव समो मन्ये यतिर्दुर्लभः ॥१२॥

અર્થઃ—આ પૃથ્વીપર પાખંડ પરાયણ, વિષયાસક્ત ચિત્તવાળા, દ્રવ્યોપાર્જનમાં તત્પર અનેક સંન્યાસીઓ વસે છે. પણ તમારા જેવો પવિત્ર, સત્યપરાયણ, ક્ષમાશીલ, સંયમી, લોકોપકારી, સદ્બુદ્ધિવાળો, અને સ્ત્રીજાતિની ઉન્નતિ માટે યત્ન કરનાર સંન્યાસી દુર્લભ છે.

प्रासादाः स्फटिकोपलैर्विरचिता राज्यं पृथिव्याः परं
कान्ता कान्तिमती कलासु कुशला भोगाः सुरेन्द्रोपमाः ।
एतेषां प्रविलोभनेन चलिता नो ते मतिः सत्यत-
स्त्वत्तुल्यो यतिरस्ति न क्षितितले शोकोऽस्मदीयस्ततः ॥१३॥

અર્થ:—સ્ફટિકથી બનેલા મહેલો, પૃથ્વીનું વિશાલ રાજ્ય, સુંદર કલાપ્રવીણ કામિની, ઇન્દ્ર જેવા સુખ–આટલી આટલી વસ્તુઓની લાલચથી પણ તમારી મતિ સત્યથી ચલિત થઇ નહિ. તમારા જેવો બીજો સંન્યાસી નથી તેથી અમારા હૃદયમાં શોક થાય છે.

गंगा शंभुजटागतापि न यशोगंगासमा ते यत–
स्तां यो गच्छति जीव एव स भवेत्पूतस्तदन्यो नहि ।
भ्रान्त्वा भूवलयं पुनाति निखिलं ते कीर्तिभागीरथी
त्वत्तुल्यो यतिरस्ति न क्षितितले शोकोऽस्मदीयस्ततः ॥१४॥

અર્થ:—મહાદેવની જટામાં રહેલી છતાં ગંગાનદી તમારી કીર્તિરૂપી ગંગાની સમાન નથી તેની પાસે જે પ્રાણી જાય છે તેજ પવિત્ર થાય છે, બીજો નહિ. પણ તમારી કીર્તિગંગા તો ફરીને આખી પૃથ્વીને પવિત્ર કરે છે. તમારા સમાન કોઇ સંન્યાસી નથી તેથી અમને શોક થાય છે.

मूर्तीनां नहि पूजनं क्वचिदपि वेदेषु संदर्शितं
नो तस्य प्रतिमा प्रभोरिति वचः सत्यं श्रुतीनामिदम् ।
नूनं वैदिकधर्म एव भुवने शान्तिप्रचारक्षम
एवं सद्वचनं वदिष्यति यतिः को निर्भयोऽतः परम् ॥१५॥

અર્થ—"મૂર્તિપૂજાનું પ્રતિપાદન વેદોમાં કોઇ ઠેકાણે નથી "તે પરમાત્માની પ્રતિમા નથી" એ વેદોનું સત્ય વચન છે ખરે-ખર વૈદિક ધર્મ જ જગતમાં શાન્તિ ફેલાવવાને સમર્થ છે" આવું સદ્વચન નિર્ભયપણે હવે કયો સંન્યાસી કહેશે ?

स्वं निर्वासितवान् सुतं दशरथो धर्मो वनं यातवान्
राज्यं सत्परिपालनाय च हरिश्चन्द्रःस्वकीयं जहौ ।
एते ते तुलनां कदापि न दयानन्दात्र गन्तुं क्षमाः
प्राणा येन तु सत्यरक्षणकृते त्यक्ता निजाः प्रेमतः ॥१६॥

અર્થ:—સત્યની રક્ષા માટે રાજા દશરથે પુત્રને દેશનિકાલ કર્યો, રાજા યુધિષ્ઠિર વનમાં ગયા અને રાજા હરિશ્ચંદ્રે પોતાનું રાજ્ય છોડી દીધું. હે દયાનન્દ, આ બધા પણ તમારી તુલના પામી શકતા નથી. કારણકે તમે તો સત્યને માટે પ્રેમથી તમારા પ્રાણ છોડી દીધા હતા.

पाषाणास्त्वयि नीचभावभरितैः क्षिप्ताः क्रुधा कैश्चन
केचिद्भोजनमिश्रितं विषमदुस्तांबूलपत्रे च ते ।
तस्मादप्यभयेन सत्यवचनं प्रोक्तं जनानां पुरः
संन्यासी तव तुल्यतां व्रजति कः सर्वत्र भूमण्डले ॥१७॥

અર્થ:—કેટલાક નીચ લોકોએ તમારાપર પત્થર ફેંક્યા. કોઇએ ભોજન અને પાનમાં તમને ઝેર આપ્યું, તોપણ તમે અભયથી માણસો પાસે સત્ય વચન કહ્યું. આખી પૃથ્વીપર તમારી તુલનાને કયો સંન્યાસી પામે એમ છે ?

धर्मोऽयं खलु मूर्तिमान् न तु यतिः साधारणः कश्चन
ब्रह्मायं श्रुतिशास्त्रकौशलयुतो वा देवतानां गुरुः ।
नोचेदस्य मुखारविन्दमतुलां कान्तिं कथं धारये-
देवं त्वां न निरीक्ष्य कस्य हृदये तर्केण लङ्घं पदम् ॥१८॥

અર્થ:—"આ ખરેખર દેહધારી ધર્મ છે. કોઈ સાધારણ સંન્યાસી નથી, વેદશાસ્ત્રનિપુણ આ બ્રહ્મા છે અથવા દેવોના ગુરુ બૃહસ્પતિ છે એમ ન હોય તો એના મુખારવિન્દપર અતુલ કાન્તિ કયાંથી હોય!" હે દયાનન્દ, તમને જોઈને કોના હૃદયમાં આ પ્રમાણે તર્ક નથી થયો?

दृष्टं यैर्वदनं प्रसादसदनं हास्यप्रभाभूषितं
वाणी वैदिकधर्मबोधभरिता पीता सुधावर्षिणी ।
यैः सार्धं चलितं त्वया विहसितं संभाषितं चाशितं
धन्यं जीवनमस्ति भो यतिदयानन्दात्र तेषां भुवि ॥१९॥

અર્થ:—જેઓએ તમારું કૃપાના નિકેતનરૂપ સ્મિતપ્રભાથી સુશોભિત મુખ જોયું છે, જેમણે વૈદિક ધર્મના બોધથી ભરપુર તમારી અમૃતની વૃષ્ટિ કરતી વાણીનું પાન કરેલ છે, જેઓ તમારી સાથે ફર્યા છે; હસ્યા છે, બોલ્યા છે અને જમ્યા છે તેમનું જીવન, હે સ્વામી દયાનન્દ, આ પૃથ્વીપર સફળ છે.

स्वर्गे गच्छति तत्प्रभा न गगने दृग्गोचरे वर्तते
चन्द्रस्यापि न चन्द्रिका हिमकरे याते क्वचिद् दृश्यते ।
नूनं त्वय्यमरालयस्य पंथिकीभावं प्रयातेऽपि ते
कीर्तिः पूर्णकलामला यतिपते रात्रिंदिवं द्योतते ॥२०॥

અર્થ:—સૂર્ય ચાલ્યો જતાં આકાશમાં તેની પ્રભા દેખાતી નથી, અને ચન્દ્રના ગયા પછી ચન્દ્રિકા દેખાતી નથી. પણ તમે સ્વર્ગમાં ગયા છતાં તમારી પૂર્ણકલાવાળી

ઉજ્જવલ કીર્તિ રાત્રિદિવસ દીપી રહી છે. સૂર્ય ને ચંદ્રને ઉદય તથા અસ્ત છે પણ તમારી કીર્તિ ઉદય થયા પછી રાત્રિ અને દિવસ એમ બંને વખતે પ્રકાશી રહી છે, તમારી ગેરહાજરી હોય તો પણ કીર્તિ તો ઉજ્જવળ જ છે.

इति श्रीलोहाणाज्ञात्युत्पन्नेन भगवत्सुतेन वल्लभदासेन गणात्रोपनामकेन विरचितः श्रद्धाञ्जलिः समाप्तिमगमत् ।



॥ ओ३म् ॥

महर्षिदयानन्दचरितम् ।

मन्दाक्रान्तावृत्तम् ।

लक्ष्मीर्नित्यं भजति चपलाचञ्चलापि स्थिरत्वं
शान्ता वृत्तिर्भवति सुखदा शारदा च प्रसन्ना ।
सावित्रीवद् धरति च मतिः सत्यरक्षाप्रवृत्तिं
यत्कारुण्याद्भवतु स शिवो भूयसे श्रेयसे वः ॥१॥


वेदोदितधर्मकर्मप्रचारागतः शंकराचार्य इवापरो, जलद इव जगदुपकारकारणजीवनो, दिवाकर इव नाशितसमस्ततमस्ततिर्हंस इव विशालमानसवसतिर्दाशरथिरिव निहतखरदूषणो ब्रह्मेव सरस्वतीसौन्दर्यगुणाकृष्टः कृष्ण इव विबुधजनसंतोषहेतुः केतुरिव धर्मस्य गङ्गाप्रवाह इव निजावतारपवित्रीकृतवसुमतीतलोऽवतार इव क्षमागुणस्य, सागर इव धीरतायाः, हिमाचल इवाचलो मूर्त इव शान्तरसो, गर्वकारणं भारतमातुः शरीरधारीव प्रथमाश्रमः स्वामी दयानन्द आसीत् ।

सावित्रीव सत्यप्रकाशा कृतज्ञानकुमुदविकासा सुजनमनोवृत्तिरिव निर्मला तस्य यशश्चन्द्रिका समुत्साहपारावारं विवर्धयन्ती सन्मार्गं सर्वाञ्जनान् नयन्ती जनितविबुधहृदयरञ्जना पाखण्डतमो दलयन्ती वसुन्धरातलं पुनातितमामविरतम् ।



શ્રીયુત પ્રતાપરાય ઉદયશઙ્કર રીન્ડાણી. બી. એ.

(ગ્રન્થકર્તાના ભૂતપૂર્વ આદર્શ સંસ્કૃત અધ્યાપક)



महर्षि दयानन्द सरस्वती।

दयानन्दस्य तु परमात्मनो भयं, ब्रह्मचर्यपालने रतिः परार्थ-साधने प्रवृत्तिरधर्मकर्मदर्शनेन कुपितावस्था, विश्वशान्तिप्रचारे परमाभिलाषश्च निरन्तरमवर्तत। वेदा एव भेदान्धतमोविलयक्षमाः परमज्ञाननिधानभूता विश्वशान्तिप्रचारसमर्था मुनिजनमानिताः स्त्रीभिः पुरुषैश्च पठनीयाः प्रचारं प्रापणीयाश्चेति तस्य गर्जना भारतीयाज्ञानजागरयत्। यद् वेदानां विस्मरणं तदार्यजातिमरण-मेवास्ति। वेदप्रचारे देशोन्नतेः संभवो दृश्यते। वेदाध्ययनो-पेक्षावशादेव देवस्य कृपापीयूषवर्षिणी दृष्टिर्दूरीभूता भारतीयेभ्यो जनेभ्यः। महावनतिपतितस्य भारतस्य पुरातनगौरवदायी यदि कोऽप्युपायो विद्यते तर्हि स संस्कृतिरक्षणे केवलं वर्तते। पुरा-तनसभ्यताया अवहेलना भारतीयजनताया अवहेलनाकारणमभवत्। सत्यमेव जयति नानृतं सत्येन पन्था विततो देवयान इति दयानन्दस्य सिद्धान्त आसीत्। तत एव खलु पाखण्डप्रचाररताः पंडिताः खंडिताभिमाना अक्रियन्त तेन।

नारीजात्युन्नतिकृते दयानन्देन महान् प्रयत्नः कृत आसीत्। पुरातनवैदिकयुगे भारतीयगौरवकारणं नारीणामुन्नता दशैषासीत्। तदा तु स्त्रियो ब्रह्मचर्यपालनतत्पराः परार्थसाधनवेदाभ्यासपरायणा युद्धकलाविशारदाः शारदासमाः समानाधिकारवत्यः सत्यशीला विश्ववन्दनभाजनं बभूवुः। ततः स्त्रीशिक्षणार्थं स्वामिना कन्या-गुरुकुलस्थापनोपदेशोऽदीयत सर्वेभ्यः।

ब्रह्मचर्यतेज एव भारतवर्षं देवभूमिं करिष्यति। जातिस्तु जन्मना नास्ति। कर्मानुसारतो मनुष्यो ब्राह्मणः क्षत्रियो वैश्यो वा शूद्रो भवति। एवंविधं स्मितसुधानिषिक्ताक्षरं सदुपदेशवचनं दयानन्देन सर्वदा जनाः श्राविताः।

यदा भारतवर्षे मुस्लिमखिस्तधर्मानुगा आर्यसंस्कृति-वृक्षच्छेदनमनसो यत्नवन्त आसंस्तदा स्वामिदयानन्दस्य प्रादुर्भावो नूनं घनान्धकारलुप्तदृष्टीनां दीपदर्शनमिव दिनकरखरतरकरनिकर-तप्तानां जलवर्षणमिव ज्वराकुलानामगदंकार इव महोपकारकारण-भूतमासीत् । महर्षिजीवनं वैदिकसंस्कृतिसंजीवनं प्रेमपुष्पसुरभितं संस्कृतभाषाकल्पलतालवालसमं धर्मसूर्योदयाचलायमानमभूत् ।

संक्षिप्तजीवनवृत्तान्तः ।

ॐ

अस्ति भारतवर्षहर्षप्रकर्षार्यकार्यक्षमपरममहापुरुषजननी, जननीव वीरताया, भूषणमिव भारतस्य, कवितेव रसमयी, सुन्दरीव मनोहारिणी, दूरीकृतासुरमदामरवरश्रीकृष्णपादारविन्द-युगलगलदमन्दमकरन्दबिन्दुसन्दोहमिलिन्दायमानभक्तजनजननप्रथि-तयशोराशिः सौराष्ट्रभूमिर्भारतवर्षपश्चिमदिशायाम् । तत्र मोरवी-राज्ये टंकाराग्रामो विद्यते । स एव महर्षिदयानन्देन जन्मना समलंकृत आसीत् । तत्र धर्मकर्मपरायणे पुराणसंस्कारभरिते ब्राह्मण-कुले निखिलयतिकुलावतंसो वेदोद्धारकः क्षीरसागरे शशीव समजायत दयानन्दः ।

दयानन्दस्यादिनाम "मूलजी" इत्यासीत् । पितुर्नाम "कर-सनजी" इति चासीत् । तज्जन्मदिने प्रथमबालकदर्शनामृतपूरपूरितौ तत्पितरौ सान्द्रानन्दसन्दोहमलभेताम् । दयानन्दस्य जनकेन विधिपूर्वं जातकर्मादिसंस्काराः कृताः । मात्रा पित्रा च पालितो लालितो दयानन्दो वृद्धिमगच्छत् ।

पंचवर्षदेशीयं दयानन्दं संस्कृतलिपिमध्यापयत्तज्जनकः। तदनु धर्मशास्त्रगता विविधाः श्लोका अपि कंठस्थीकृताः। अष्टमे वर्षे यज्ञोपवीतसंस्कारा विहिताः। सावित्रीमन्त्रा यजुर्वेदसंहितामंत्राश्च पूर्णतया दयानन्देनापठ्यन्त। तस्य कुटुम्बं मदनदमनभजनपरायणमासीत्। ततः शिवमतसंस्कारवान् यथा स्वपुत्रो भवेत्तथा तदीयः पिता प्रायतिष्ट। स्मरहरहरमहोत्सवदर्शनार्थं स दयानन्दं वारंवारं शिवनिकेतनमनयत्।

चतुर्दशवर्षवयोऽवस्थां प्राप्तो दयानन्दः शङ्करूपावलिसमव्याकरणलघुपुस्तकानि पठितवान्। वेदमन्त्रा अपि कतिचिदधीताः। एकदा महाशिवरात्रिप्रसंगे दयानन्दस्य तातस्तं व्रतपालनं कर्तुमाज्ञापयत्। तदपि दयानन्दमनस्तत्र नालगत्। दयानन्द उपवासमाचरदिति तस्य जनन्या अपि विचारो नासीत्। किन्तु जनकस्याज्ञावश्यकर्तव्यतामागमत्।

नगराद् बहिरेकमनेकवृक्षघटामध्यस्थितमासीत्पशुपतिमन्दिरम्। तत्र शिवरात्रिदिवसे शिवसेवनमनसः पुण्यामृतपानपिपासवो वासवोचितसुखाशाधृतव्रता नरा नार्यश्चागच्छन्। दयानन्दोऽपि पित्रा सह तत्र पूजाजागरणार्थमगमत्। स्तुतिपरैस्तत्र पठ्यमानाः श्लोका घण्टानादैः सह कर्णविवराणि बधिरयन्तिस्म। नक्षत्रैश्चन्द्र इव मणिभिर्मुकुट इव दीपैस्तन्मन्दिरमशोभत। दयानन्दोऽपि निरस्तसमस्तविचारः परमशिवदर्शनलग्ननेत्रयुगलो ध्यानैकाग्रमनाश्चित्रार्पित इवालक्ष्यत। निशायाः प्रहरद्वयं यावत् तु सर्वैर्भक्तैः पूजाविधिर्निर्वर्तिता सम्यक्।

तृतीये प्रहरे निद्रा समग्रजननयनचुम्बनमकरोत्। परं भक्तिशक्तिभीतेव, ज्ञानानलज्वालाजालतापमसहमानेव दयानन्दनेत्रस्पर्शक्षमतां नालभत सा। सर्वेषु सुप्तेषु केवलं दयानन्द एव मुरारिरिव

प्रलयसमयेऽजागः। एतस्मिन् काले जातः कश्चिद्दयानन्दचेतोमन्दिर-प्रकाशकश्चमत्कारः। केचिन्मूषकाः शिवमूर्तेरुपरि परिभ्रमन्तो भक्ष्यपदार्थभोजनं कुर्वन्त इतस्ततोऽनृत्यन्।

एतद्दर्शनसमकालमेव दयानन्दस्य मनो विविधतर्कसागरतरंग-भंगसंगव्याकुलमजनि। विश्वनियन्ता वृषभध्वजो मकरध्वजारि-स्त्रिशूलधारी तांडवनृत्यनिपुणो यः शिवः किं तस्येयं मूर्तिरस्ति? प्रबलबलशाली शूली मूषकैः क्रियमाणमपमानं कथं सहेत? ईदृशीं दशां स कथमापतेत्? नायं पंचसायकमददलनपटुरतुलप्रभावो गणनायकः सावित्रीवन्दितः क्षेमंकरः शंकरो न चेयं तस्य मूर्तिरिति मे प्रतिभाति। शंभोर्मौनं मूषकलीलां चाधिकृत्य समुत्पन्नास्तस्य शंका न कथमपि समाधानमयुः। अयं वृत्तान्तो दयानन्दजीवन-परिवर्तनकारणं समजनि। समायातश्चासौ शिवधर्मपरित्यागसमयो मूर्तिपूजनमिथ्यात्वप्रतिपादनक्षमो दयानन्दसमीपम्। संशयसमा-धानाभावेन पितरं जागरयामास विनयपुरःसरं शंकापहारकृते प्रश्नपरंपरामपृच्छच्च तम्। किन्तु पित्रापि संतोषजनकप्रत्युत्तराणि न दत्तानि। अतः प्रबलतमो विरोधः संजातः। दयानन्देन निश्चय-पूर्वं ज्ञातं यन्नायं शिवः किन्तु पाषाण एवास्ति। स्मरहरमन्दिरे निद्रानिमीलितलोचनं पितरं परित्यज्य सूचिभेद्यतमोभयंकरे काल-रात्रिसमयेऽपि स स्वयमेकाकी सदनमगच्छन्मातरमजागरयदुप-वासभंगमकरोच्च। निखिलां निशां विचारमालाव्यापृतमना एवा-नयत्। मूर्तिपूजाविरोधेन दयानन्दस्य मनसि पदं लब्धम्।

ततः परं महाशिवरात्रिद्वितयमपि व्यतीतम्। किन्तु न काऽपि महत्त्वपूर्णा घटना समजायत। दयानन्दस्य तातस्तं स्वव्या-पारपारगं कर्तुमयतत सततम्। किन्तु काचिद् घटना संजाता यया दयानन्दस्य हृदये संसारं प्रति तिरस्कारो जनितः।

षोडशवर्षवयोऽवस्थां प्राप्ते दयानन्दे निकटज्ञातिजनगृहे मंगल-प्रसंगवशादामंत्रणमागतं नृत्योत्सवदर्शनाय । दयानन्दो जनकेन साकमगमत्तत्र । अल्पसमयानन्तरमेव सेवकः कोऽपि व्याकुलमानसः सदनादागत्य दयानन्दभगिनीशरीरं विषूचिकाराक्षसीवदनकुहरं पतितमतिकष्टमनुभवतीति निवेदितवान् । दयानन्दः सत्वरसत्वरं गृहमगच्छत् । सर्वः परिवारो निवारितेतरकरणीयजातस्तदा तदीयसेवातत्परो जातः । अगदंकारैरात्ममतिबलपूर्वं चिकित्सा कृता, सर्वौषधिप्रयोगाः कृताः किन्तु कापि सुधारणा नाद्दश्यत । राहुवदनग्रस्तां शशिकलामिव, वृकमुखपतितामजामिव, व्याध-पाशबद्धां हरिणीमिव, मदकलकरटिधृतां नलिनीमिवज्वलनज्वाला-मालाकुलां कल्पवल्लरीमिव, प्रखरनिदाघभानुभानुशुष्यज्जलां घनवदीमिव, रावणहस्तगृहीतां जानकीमिव, तां विषूचिका-क्रान्तगात्रां दृशं दृशं सर्वो दयानन्दपरिवारः प्रबलसंतापसंजाता-श्रुप्लुतनयनः समजनि । वाचापि नयनजलप्रवाहनिरुद्धेवोष्णोच्छ्वा-सदाहभीतेव बहिरागन्तुं न समर्थाभवत् । ईश्वरेच्छा बलीयसी, तत्र मानवानां शक्तिः प्रतिहता भवति, तस्य कोऽप्यपूर्वो हेतुर्विद्यते प्रभोरिति ज्ञातुं कः प्रभवेत् । तदनु भगवच्चरणारविन्दानन्दा-मृतरसिको दयानन्दभगिन्या आत्मा दिवमलंकृतवान् । सर्वे परिवार-जनाः शोकाकुलाः साविरलगलच्छोकाश्रुधारं मुक्तकंठमरुदन् । किन्तु दयानन्दोऽन्तर्बाष्पः स्वभगिनीमृतशरीरं निर्निमेषं विलोकयतिस्म । तदीये मनसि विचारा एवंप्रायाः समजनिषत । मम भगिनीव नूनमेकदा सर्वे जना विकरालकालानले पतंगतां गमिष्यन्ति । जीवनं क्षणभंगुरम् । संसारमोहो मृगतृष्णाप्रायो निपातयति महति संकटे जनान् । नास्ति सुखं तत्र चिरस्थायि । ततो येनोपायेन जन्ममरणा-भावो भवेत् स आश्रयणीयो मया । एवंविधविचारपरंपरया दया-नन्दस्य मनो संसारासारावगमपरमरमभवत् । वैराग्यभावना च

दृढीभूता भूतार्थज्ञानदायिनी। रात्रिंदिवमपि दयानन्दचित्तं वैराग्य-विषयविचारतरंगप्रेंखोलितं न कथमपि शान्तिमभजत्। कतिपय-दिवसानन्तरं तस्य पितृव्योऽपि विषूचिकाराक्षसीवदनकवलतां प्राप्तः संसारमसारं विहाय सत्वरममरसदनपथिकोऽभवत्। अनेन वृत्तान्तेन वैराग्यज्वलनज्वाला प्रचंडवेगेन वृद्धिं प्राप्ता। स्वपितृसमीपे निज-विचारो दयानन्देन न प्रकटीकृतः किन्तु केषांचित्पंडितानामग्रे केन प्रकारेणामरपदलाभो भवेदिति विचारो निवेदितः। तैस्तु योग-साधना केवलं तत्र कर्तव्येति कथितम्। सुरपदप्राप्तिसाधनजिज्ञासया दयानन्दस्य मनसि प्रबलं पदमलभ्यत। एकदा स्वमित्राणि सोऽकथयद् यन्मया निर्णय एवंविधः कृतोस्ति यदयं संसारः सारारहितोऽस्ति। तत्र किंचिदपि वस्तु वस्तुतस्तादग् न दृश्यते यस्मिन् जनः स्नेहं कुर्यात्। अतोऽहं संसारं नीरसं मन्ये। एषा वार्ता मित्रैस्तज्जनकाय निवेदिता। ततस्तस्य तातो वैराग्यज्वालाशान्त्युपायमूलं विवाह-मंगलमापादयितुमैच्छत्। एतद् विज्ञाय दयानन्दः परमं विरोधम-दर्शयत्। तेन लग्नविचारोऽल्पसमयं यावत्परित्यक्तः।

दयानन्देन ज्ञातमेतद्यदेकविंशतिवर्षवयोऽवस्थाप्राप्तिसमये विवाहोऽवश्यं भविष्यति। तेन स गृहपरित्यागाय निश्चयमकरोत्। पितरमागत्य चावददुदञ्जलिर्यदहं विद्याध्ययनार्थं काशीं गन्तु-मिच्छामि। कृपया मां तत्र भवान् प्रेषयतु। किन्तु स्वपुत्रविरक्त-मनोविचारज्ञः पिता संमतिदानानुग्रहं न दर्शितवान्। तदनु दयानन्दोऽवदद् यदितः क्रोशत्रयान्तरे कोऽपि वृद्धपंडितो वसति तत्र मां प्रेषयितुमर्हति भवान्। तेन दयानन्दपिता तं तत्र प्रेषयामास। एकदा विवाहविषयमधिकृत्य वार्तालापे प्रवृत्ते, दयानन्देन कथितं यद् विवाहं प्रति मे घृणा वर्तते। एतन्निशम्य स वृद्धपंडितो दयानन्दजनकं विदितवृत्तान्तमकरोत्। ततो दयानन्दो गृहमानीतस्तज्जनकेन।

सर्वः परिवारो दयानन्दविवाहप्रसंगानन्दसागरतरंगभंगसंगः परमोत्साहपूरपूर्णो विविधमंगलाभूषणाम्बरभूषितः समजनि। किन्तु दयानन्द एव चिन्ताज्वालाकुलमनोमन्दिर आसीत्। भ्रमणानन्तरमहमधुनेवागमिष्यामीति वदन् स रात्रौ मुक्तिसदनगमनविघ्नमिव, निजपरिवारस्नेहं परित्यज्य पलायनमकरोत्। अमरजीवनौषधिप्राप्त्या मृत्युरोगनिवारणकामना केवलं तत्र कारणमासीच्च निजग्रामाद् विंशतिक्रोशान्तरस्थिते मारुतिमन्दिरे रात्रिकालमक्षपयद्दयानन्दः।

दयानन्दपलायनसमाचारज्ञानसमकालमेव जलदपटलाच्छादितःशशीव सौदामिनीपातदग्धविटपीव, निर्गतरसेक्षुदण्ड इव, हिमहतनलिनीखंड इव सर्वः परिवारोऽपारखेदद्रुतवहदाहम्लाननारविन्दोऽलक्ष्यत। दयानन्दस्य जनकेन तदन्वेषणाय सर्वतस्तन्मार्गणपरा नराः प्रेषिताः। किन्तु तेषां प्रयासो न सफलतामलभत।

दयानन्देन मार्गस्थितैका साधुवेषधारिणी धूर्तसभा दृष्टा। तन्मध्यादेको धूर्तो दयानन्दस्य हस्तं मुद्राभूषितं वीक्ष्याभाषत यद् भूषणालंकृतस्त्वं साधुर्भवितुमिच्छसि, वैराग्यसिद्धेः किमयमुपायो वर्तते। अतः प्रभुमूर्तिसमीपे सुवर्णमुद्रोपहारत्वेन निधीयताम्। एतन्निशम्य दयानन्दः सुवर्णमुद्रां त्यक्त्वा स्वमार्गेण चलितः। दयानन्देन श्रुतं कुतोऽपि यत्सायलेनामकेग्रामे कोऽपि विचारवान् "लालाभक्त" इति योगी वसति। तदाश्रमोऽनेकसाधुसंगकेन्द्रीभूत आसीत्। तस्मिन् ग्रामे वसता केनापि ब्रह्मचारिणा सह दयानन्दस्य समागमो जातः। नैष्ठिकब्रह्मचर्यपालनं कर्तव्यमिति तदुपदेशानुरोधेन लब्धदीक्षो दयानन्दो धृततुम्बीपात्रः शुद्धचैतन्यनाम प्राप्तवान्।

शरीरधारी प्रथमाश्रम इव, काषायवस्त्रत्वेन बालसूर्यप्रभाश्लिष्ट इव, शुद्धचैतन्यनामधारी दयानन्दो भक्तरामाश्रमे बहुदिनानि यावद् योगसाधनासक्तमना अभवत्। किन्तु संतोषो न लब्धः। कुतोऽपि

दयानन्देन श्रुतं यत्सिद्धपुरनगरे महान् मेलो भविष्यति तत्र च साधवो योगिनश्च गमिष्यन्ति। एवं कोऽपि योगी लप्स्यते यस्य कृपयामरजीवनौषधिं प्राप्स्यामीति मतिं कृत्वा दयानन्दस्तत्र गत एकस्मिन् महादेवायतने निवासमकरोच्च।

महति संमेलने विपुलसंख्या जना विविधदेशेभ्य उपस्थिता अभूवन्। सर्वे निर्भरानन्दभाजो दिवसान् नयन्ति स्म। किन्तु दयानन्दः प्रतिकुटीरं गत्वा सर्वं साधुं नत्वा भवभयजयशीलयोग-विद्याध्यापनायं प्रार्थयति स्म।

केनापि परिचितेन जनेन दयानन्दजनकाय पत्रद्वारा सर्वो वृत्तान्तो निवेदितः। ततोऽसौ रक्षकचतुष्टयसहितः सिद्धपुरमागत्य शिवालये दयानन्दं काषायाम्बरधरं वीक्ष्य कोपदन्दह्यमानमानो भीषणाकृतिस्तर्जयन्नेवमवदद्दयानन्दम्। कुलकलङ्क, तव माता त्वद्विरहमसहमाना दुःखिता प्राणत्यागतत्परा वर्तते। कथं दयालवोऽपि त्वयिन दृश्यते। पितुर्वचनं निशम्य तत्कोपानलशमन-प्रतीकारमत्या परमादरपूर्वं तच्चरणारविन्दयुगलचुम्बलुलाटोऽवदद् भो जनक, क्षम्यतां ममापराधो मया त्वन्यजनप्रेरणया गृहपरि-त्यागोऽकारि न तु स्वतः। दयानन्दजनककोपस्तदपि न शान्तिभा-जनमजनि। स्वनिवासं तं नीत्वा पुनर्न पलायनं कुर्यादिति रक्षापुरुषं न्ययुंक्त। अखिलं दिवसं रजनीं च रक्षापुरुषेण दयानन्दस्योपरि निरीक्षणं कृतम्। द्वितीयस्मिन् निशासमयेऽपि तथैव स्थितिरभवत्। दयानन्दस्तु विचारतरंगप्रेंखोल्यमानमानस आसीत्। रात्रिजागरण-श्रमवशान्निद्रामुद्रितलोचनोऽभवद्रक्षापुरुषः। तं तथावस्थं दृष्ट्वा दयानन्दोऽविदितपादसंचारो धृतजलघटस्त्वरितं निरयात् कुत्रापि वृक्षेऽनेकपत्रसंचयान्तर्लीनोऽतिष्ठच्च। प्रभातायां निशायां दयानन्दः पलायित इति विदित्वा तस्य पित्रा पुनरपि तदन्वेषणाय पुरुषाः

प्रेषिताः परं ते सर्वत्र निपुणमवलोक्य व्यर्थप्रयासा एव निवृत्ताः। अतो निराशया परया दयानन्दस्य जनकः स्वदेशप्रयाणमानसोऽभवत्। पितरं स्वनगरकृतप्रयाणमपि वीक्ष्य दयानन्दो वृक्षान्नावातरत्। रात्रिंदिवं क्षुधापरीतेन तेनास्थीयत तरावेव। द्वितीयेऽहनि जनिताशक्तिरयतीर्य ततो नातिदूरस्थग्रामं गन्तुं प्रातिष्ठत। एवं स विविधेषु ग्रामेषु विचरन् नर्मदातीरमगमत्। तत्र वेदान्तशास्त्रकुशलस्य कस्यचित्परमहंसपरमानन्दनाम्नः संन्यासिनः समीपे कतिचिद् मासान् वेदान्ताभ्यासपरायणोऽवर्तत। संन्यासदीक्षाप्राप्त्यर्थं दयानन्देनामन्दः प्रयत्नः कृतः किन्तु निष्फलतालभ्यत। अत्रान्तरे दयानन्देन ज्ञातं यत्कोऽपि पूर्णानन्दसरस्वतीनामा दण्डी स्वामी सशिष्यो नर्मदातटमार्गेण द्वारिकायात्रार्थं गच्छति। ततोऽसौ तमगमदनमच्च। तदीयमद्वितीयप्रतिभामपारज्ञाननिधिं परमरमणीयपवित्रचारित्रं च दृष्ट्वा दयानन्दो विस्मयमयमना अजनि। संन्यासदीक्षाकृते तं व्याजिज्ञपच्च। प्रथमं तु दयानन्दवयोविचारेण तत्प्रार्थनास्वीकारं स नाकुरुत। अन्ते दयानन्ददृढनिश्चयदर्शनानन्तरं दंडदानपूर्वं तं संन्यासदीक्षयान्वगृह्णात्तस्य नाम "दयानन्दसरस्वती" इति कृतवांश्च किंचित्कालं दयानन्दस्तेन सार्धमघसद्धर्मशास्त्राभ्यासकृतप्रयासः। किन्तु तत्रापि संतोषो न लब्धः। ततो दयानन्दः कमपि प्रखरतरमतिशालिनं प्रबलप्रेरणादानसहवासं सद्गुरुं प्राप्तुं काशीं प्रति प्रचलितः। परिभ्रमणप्रसंगवशाच्छ्यानन्दगिरिज्वालानन्दगिरिनामकाद् योगियुगलाद् योगाभ्यासमकरोद् दयानन्दः। किन्तु मनःसंतोषाभावेन वितस्तायमुनामन्दाकिनीप्रभवे भवेशानीपादारविन्दवन्दनानन्दितमुनिवृन्दसेवितविवरे वरेण्यगुणिगणगीयमानगौरवे नवेन्दुभूषणशंकराट्टहासधवले, कस्तूरीमृगसुरभितशिलातले चमरीवालवीज्यमाने विविधविहंगगणकलकलनादितवृक्षे सुन्दरतरकुसुममकरन्दबिन्दुमिलन्मिलिन्दमंजुगुंजनगुंजितनिकुंजपुंजे

गगनतलचुम्बदुत्तुंगशृंगमण्डले वन्यपशुभुजगाजगरनिवासभयंकरे शंकरेक्षणक्षणायातदेवगणे, संततत्तुषारपातमिषेण गगनवासिभिरभिषिक्त इवापूर्वमहिमालये हिमालये क्वचित् परिभ्रमणश्रमक्षुधाबाधितः क्वचित्तीव्रकंटकविद्धचरणः क्वचिदतिशीततमपवनजनितकम्पः क्वचित्तुषारपतनविघ्नपीडितः, क्वचिन्नष्टजीविताशः परमसामर्थ्ययुक्तयोगिवर्यगवेषणकृतैषणः प्रतिकन्दरं प्रतिशिखरं प्रतिकुटीरं च धीरताधनः स्वामी दयानन्दोऽगच्छत् । तथापि योगविद्याविशारदः हिमकर इव तिमिरहरोऽमरजीवनागददानसमर्थोऽनर्थोदयनिवारकः प्रतिभाशाली परसत्यनिरतः कोऽपि महात्मा नयनातिथिर्नाभवत् । एवं हिमालयान्निवृत्तः स्वामी दयानन्दो विविधनगरेषु योगिवर्यलाभाशया निवासं कृत्वान्ते श्रीकृष्णदेहप्रभामिव नदीरूपं गतां पापापहारिणीं कदम्बनिकुरम्बगुंजदलिगणनिमंत्रितयात्रिकगणां श्यामामपि विमलां यमुनां दर्शं दर्शं भक्तिभावभरिता अमिता भक्तजनाः सनातनीया यत्र गीताया रचयितारं श्रीकृष्णं स्मरन्तो वस्तुमभिलषन्ति तत्र मथुरायां कानिचिद्दिनानि निवासाय मतिमकुरुत । तदा सदाचारप्रथितकीर्तिः स्पष्टवक्ता कपटरहितप्रकृतिः कृतिजनवन्दनीयचरितः सरलवृत्तिः साधुर्विरजानन्दसरस्वतीनामक आसीत् । विरजानन्दस्य व्याकरणज्ञानं विद्वज्जनप्रशंसाभाजनमभवत् । आर्षग्रन्थेषु तस्य महान् पक्षपातोऽवर्तत । एकाशीतिवर्षदेशीयो विरजानन्दः प्रज्ञाचक्षुरासीत् । मथुरां प्रविष्ट एव दयानन्दः स्वामी विरजानन्दकुटीरमागत्य द्वारमताडयत् । कोऽसीति तेन पृष्टो दयानन्दसरस्वतीति निजनामनिवेदितं दयानन्देन । अपि त्वया व्याकरणमधीतमिति प्रश्नं श्रुत्वा दयानन्दोऽवदद्यन्मया सारस्वतादिव्याकरणग्रन्था अधीताः सन्ति । एतन्निशम्य विरजानन्देन द्वारमपावृतम् । क्षितितलनिहितजानुकरकमलेन दयानन्देन विरजानन्दाय नमस्कारः कृतस्तन्निर्देशानुपद-

मासनमंगीकृतं च । विरजानन्दो दयानन्दममन्दानन्दसीमानं प्राप्तोऽब्रवीत् " दयानन्द, त्वदधीतग्रन्थेषु प्रायोऽनार्षग्रन्था विद्यन्ते । आर्षशैली सरला सुन्दरा च वर्तते । किन्तु जनैस्तदवलंबनं न क्रियते । यावदनार्षसरणिं न त्यक्ष्यसि तावदार्षग्रन्थमर्मज्ञानं न भविष्यति । मन्निकटेऽध्ययनं चिकीर्षुश्चेदसि तर्हि मनुष्यकृतग्रन्थविस्मरणं करणीयं त्वया । " तदनु स्वीकृतविरजानन्दोपदेशो दयानन्दस्तच्छिष्यतामयात् । सर्वदा स्वगुरुकृते स्नानजलानयनं, वस्त्रप्रक्षालनं, गृहमार्जनं, पाकक्रियां च दयानन्दोऽकार्षीत् । क्वचित्क्वचिद् विरजानन्दः प्रबलकोपानलवशगो भूत्वा दण्डेन दयानन्दशरीरे प्रहारमप्यकरोत् तथापि स तं कुसुमपातसमं गणयित्वासहत । एकदा गुरुणैतादृशः प्रहारो दयानन्दहस्ते कृतो यथा तज्जन्यश्यामकलंक आजीवनादतिष्ठत् । एवं विद्याभ्यासनिरतेन तेन महत्कष्टमसह्यत । सार्धवर्षद्वयं विरजानन्दसमीपे दयानन्दोऽष्टाध्यायीमहाभाष्यवेदान्तसूत्रादिपुस्तकान्यपठत् । परिसमाप्तविद्यो दयानन्दोऽनुज्ञासंपादनेन देशाटनं चिकीर्षुर्विरजानन्दचरणयोर्निपत्याब्रवीत् " पूज्यगुरुचरणाः, भवद्भिरपारकृपापारावारमयैर्विद्यादानेन मयि महोपकारोऽकारि । अधुना देशाटनचिकीर्षया भवतामनुज्ञां याचे । मम समीपे तु केचिल्लवंगाः सन्ति तानहं भवद्भ्य उपहारीकरोमि । एतन्निशम्य विरजानन्दोऽभाषत यद् वत्स, त्वदर्थं मम मंगलकामना वर्तते । ईश्वरस्य कृपया प्रयातु सफलतां तव विद्याकलावल्लरी । गुरुदक्षिणात्वेन तु लवंगवर्जं किंचिदन्यद् वस्तु याचे । दयानन्देन निवेदितं यदाज्ञापयन्तु गुरुवर्याः । तत्परोऽस्मि भवदादेशस्रजं शिरसा ग्रहीतुम् । हर्षपीयूषवर्षिणीं प्रोत्साहनरसमयीं--स्वप्रियशिष्यस्य गिरमाकर्ण्यावर्णनीयहर्षभरितो विरजानन्दः साशीर्वादं तमवदत् यद् वत्स दयानन्द, भारतवर्षे बहुविधवेदनागर्तासु दीनजना निमग्नाः सन्ति ।

गच्छ तेषामुद्धारं कुरु । विविधमतमतान्तरप्रचलिताः कुरीतयो निवार्यन्ताम् । आर्यजनतायां विपरीतां दशां दूरीकरु । आर्षशैली-प्रचारेण वेदादिग्रन्थपठने लोका नियुज्यन्ताम् । क्रियात्मकं जीवनं विधेहि । एतदेव त्वत्तो गुरुदक्षिणात्वेन लिप्सुरहम् । गुरुवचन-श्रवणानुगदमवद्दयानन्दो यथा भवदीयाज्ञापालनं करिष्ये सम्यक्तया ।

लब्धानुज्ञो दयानन्दः पुनरपि वैदिकसंस्कृतिसमुद्धाराय धर्मव्याजेन दुराचारप्रवृत्तिपरपाखण्डपटुधर्मगुरुजालबद्धां जनतां सन्मार्गं नेतुं परमं प्रयत्नमकरोत् । प्रथममर्गलपुरं गत्वा स्वामी वैदिकधर्मप्रचारपरं भाषणमकुरुत । पुराणमार्गप्रवृत्तेषु महान् कोलाहलः समजायत । स्वार्थपरायणानां धर्माचार्याणां मनः कम्पमभजद् बहूनां हृदयं च विविधविचारसागर-कल्लोलमालाकुलं समजनि । स्वामिनः प्रतिभया शास्त्रज्ञाननिपुणतया सत्यदर्शनकारितया च सकलमर्गलपुरं विस्मयाकुलमभूत् । ततो ग्वालियरनगरं गत्वाजमेरनगरे मूर्तिपूजनं वेदविरुद्धं वर्तत इति विषयप्रतिपादनाय स्वामिना भाषणानि कृतानि । वेदार्थाय विविधाः सभा आकारिताः पश्चाद् हरद्वारं कुंभमेलदर्शनाय स्वामी दयानन्दोऽगच्छत् । तत्र नानादेशवासिनो भागीरथीजलस्नान-गौरवश्रवणजातविविधभावना भक्तजनाः, संन्यासिनः साधवः, पंडिता राजानश्च समागता आसन् । तेषां सन्निधौ मूर्तिपूजा-विरोधमूलानि पाखण्डखण्डनपराणि वैदिकसिद्धान्तप्रतिपादितानि भाषणानि विगतभयः स्वामी दयानन्दो नवजलभरितजलदगंभीर-रवेणाकरोत् । केवलं वेदा एवार्याणां धर्मपुस्तकानि सन्ति । वेदानां परित्याग एव परस्परविरोधकारणमजायत । पुराणानि धर्मपुस्तकानि न सन्ति । संप्रदाया भारतगौरवचन्द्रिकाकालमेघाः

सन्ति । वेदपताका सर्वैक्यसाधना धार्यतामिति स्वामिना कथितम् । स्वामिन इयं गर्जना परमान्धश्रद्धातिमिरनष्टसत्यासत्यविवेकानां स्वार्थैकनिरतात्मनां धर्मगुरूणां श्रवणगोचरतां गतापि सफला नाभवत् । कुंभमेले पंडितंमानिनो, गीर्वाणभाषानभिज्ञा व्यभिचारविचारदूषितमतयो धर्मकर्मवर्जिता धर्माचार्या दृष्टाः । परं न केचन जिताक्षा यतीश्वरा वराशया जगदुपकारकारणचणा नयनविषयमयुः । एतादृशीं दुर्दशां दर्शं दर्शं स्वामिनो नयनाभ्यां विगलन्ती बाष्पधारा कपोलतलयुगलमलंकृतवती ।

आर्याणां पुरातनं गौरवं नष्टप्रायं कुर्वतां समाजराक्षसानां बाहुल्यमपहर्तुं समधिकतपश्चर्यायत्तं चित्तं स्वामिनाकारि । परोपकारमहायज्ञानुष्ठानमानसेन कौपीनवर्जं समीपे विद्यमानं महाभाष्यपुस्तकादिकं सर्वं वस्तु मथुरास्थिताय स्वाचार्याय स्वामिना प्रेषितम् । एकदा हरद्वारे निजकुटीरमागत्य केनापि जनेन निगमकल्पतरोर्गलितं फलं भागवतमस्तीति पठितम् । वेदाद् भागवतमहिमा गरीयानिति वितथं वचो निशम्य परित्यक्तमौनव्रतेन व्रतिना दयानन्देन भागवतखण्डनारम्भः कृतः । ततो हरद्वाराद् दयानन्दः परीक्षितगढकर्णवासादिषु नगरेषु जागृतिमुत्पादयन्ननूपनगरमायात् । तत्र रामलीलाप्रवृत्तिखण्डनं विहितम् । यद् धृतरामसीतावेषा जना नगररथ्यासु भ्रमणपराः सन्ति तदपमानजनकं लज्जावहं च कृत्यमस्ति । एवंविधैः परिणामसुखप्रभवैः स्वामिन उपदेशवचनैरनेकजना रोषानलज्वलिता अभूवन् ।

अथैकदा कोऽपि ब्राह्मण आगत्य स्वामिने ताम्बूलवीटिमयच्छत् । भक्षितमात्रायां तस्यां तद्गतविषवेदना स्वामिनः शरीरे प्रावर्तत । सत्वरं गंगातटं गत्वा योगक्रियापटुना स्वामिना विषप्रभवा पीडा

दूरीकृता। तद्ग्रामाधिपेनासौ विषप्रदो ब्राह्मणः कारागारे निबद्धः। एतद् ज्ञात्वा स्वामिनाश्चेतेऽप्रसन्नतया पदं कृतम्। तद्ग्रामाधिपेन कारणं पृष्टो दयानन्दोऽवदद् यन्मम श्रवणसरणिमियं वार्ता समापतितास्ति यत् कोऽपि मदर्थं कारावासे निक्षिप्तोऽस्ति। सकलमानवबन्धनमोचनकारणमेव ममागमनमस्ति। कमपि बन्धने निपातयितुमहं नेच्छामि। यदि नीचा नीचाशयं न त्यजेयुस्तर्हि कथमहं महत्तां जह्याम्। ईदृशं स्वामिनो वचनामृतं निपीय ग्रामाधिपस्तु विस्मयमयान्तःकरणो भूत्वा करौ सम्पुटीकृत्य नमस्कारावनतं शिरः कृत्वा ब्राह्मणं मुक्तबन्धनमकरोत्।

कर्णवासनगरे ठाकुराभिधक्षत्रियेभ्यो यज्ञोपवीतानि स्वामिना वितीर्णानि। माघमासे १९२४ तमे विक्रमवर्षे सूर्यग्रहणमुद्दिश्य कर्णवासपुरे महासंमेलनमजायत। परःसहस्रा मनुष्यास्तत्र गंगास्नानार्थं समुपस्थिता आसन्। स्वामिनः कीर्तिचन्द्रिकाप्रकाशेन प्रागेव बहुप्रदेशा धवलीकृता आसन्। बहुभिः स्वामिनोऽलोकसामान्यभाषणपटुतां प्रतिभां ब्रह्मचर्यशक्तिं च समुद्दिश्य प्रशंसा श्रुतासीत्। अतस्तेषां मनः स्वामिनो वदनचन्द्रिकामुपोषिताभ्यां नयनाभ्यां पातुमत्यातुरमभवत्। संरुयातीता मनुष्याः स्वामिदयानन्ददर्शनेन परमानन्दमविन्दन्त शंकासमाधानमलभन्त, वेदवचनसारपीयूषं श्रवणपुटाभ्यामातृप्ति चापिबन्। नूनं महतां महामहिमशालिनां दर्शनमपि क्षपयति दुरितचयमपनयति भाग्यदोषं, जनयति दिव्यप्रेरणां, दलयति यमसदनभयं, वितरति च परमपरमां परमात्मभक्तिरतिम्। अहो प्रभावस्तपसाम्। तत्र स्वामिना पुराणमूर्तिपूजनशैवशाक्तवैष्णवादिसंप्रदायानां वेदविरुद्धत्वं प्रतिपादितम्।

एकदा सोरोंनामके ग्रामे दयानन्दभाषणेन वैष्णवसंप्रदायानुगाः कालपाशपतिता इव, प्रबलाष्टापदगृहप्रविष्टमक्षिकागणा इव

रोषग्रहग्रस्ता इव नष्टधनजना इव व्याकुला भूत्वा तज्जीवनापहरणकृतमतयोऽनन्यगतयो महत्कपटयन्त्रमकुर्वन् । व्याख्यानसमये कोऽपि कोपारक्तनयनो गृहीतलगुडो दृढवपुः पापमतिजाटः स्वामिनं दन्तैर्दन्तान्निष्पिष्याभाषत यत् स्वामिन् गंगानिन्दापरस्य कृतमूर्तिपूजनखण्डनस्य देवगणापवादशीलस्य तव कस्मिन्नंगे प्रहारं कृत्वा त्वां स्मर्तव्यदशां नयेयमिति ब्रूहि सत्वरम् । समस्ताः श्रोतार एतद् निशम्य चित्रार्पिता इव विस्मयस्तब्धदृष्टयोऽभूवन् । स्वामिना तु हृष्टमनसा गंभीरतरस्वरभरितया वाचयोक्तं यद् भद्र, यदि त्वन्मतेन धर्मप्रचारो दोषपक्षमारोप्यते तर्हि तत्प्रेरके मम शिरसि प्रहर । यतः खण्डनपरा विचारास्तत्रैव संभवन्ति । एवं प्रोच्य शोच्यतमचिन्तावस्थे तस्मिन्भाटे स्वामी दयानन्दो दृष्टिपातमकृत । तेन स्वामिनयनकिरणरज्जुनिबद्ध इव निजकोपानलदग्धमनोमन्दिर इव सर्पीभूतदण्डदष्ट इव, शीतज्वराविष्ट इव कम्पमानगात्रयष्टिः स जाटः समजनि । दयानन्दशिरःप्रहारपातकभीत इव ब्रह्मस्वर्यानलदाहमसहमान इव, स्वापराधक्षमायाचनामना इव, महर्षिचरणारविन्दवन्दनानन्दलिप्सुरिव पृथिवीदेव्याहूत इव तस्य हस्ताद् दण्डोऽपि महीतले तत्क्षणमपतत् सकलजनदृष्टिभिः सह । असौ जाटस्तु जातपश्चात्तापः शापशंकित इव स्वामिनः पादस्पर्शं कृत्वा निजापराधक्षमामयाचत । मालाक्रमं रचयन्ती नयनजलधारा तन्नेत्रयुगलाद् द्रवीभूतहृदयं दर्शयन्ती प्रावर्तत । निरीक्ष्यैतत् स्वामी तं मधुरया गिराश्वासयन्नवदत् । त्वया न कोऽप्यपराधः कृतोऽस्ति । यतस्त्वया प्रहारो न कृतः । किमेवं वृथा रुद्यते त्वया । गच्छ, परमात्मा त्वां सत्यमार्गं नयतु । एवंविधं दृश्यं दृष्ट्वा सर्वे दयानन्दसहनशीलताप्रशंसामकुर्वन् । बहवः साधवोऽद्यावधि दृष्टिविषयमयुः किन्तु दयानन्देन तुल्यः

कोऽपि क्षमावान् निर्भयः शान्तस्वभावो महातेजस्वी न दृष्टोऽस्माभिरिति सोरोग्रामवासिनो जना विस्मयसागरनिमग्नमानसा अवदन्।

कर्णवासनगरे गंगास्नानसंमेलनमभूत्। परःसहस्राः स्त्रीपुरुषास्तत्र गंगादर्शनपूजनकामनाः संमिलिताः। रावकर्णसिंहोऽपि तत्रागच्छत्। तस्य निवासे रासलीलोत्सवारंभोऽजायत। केचित्पंडिता दयानन्दं तत्रागन्तुं प्रार्थितवन्तः। किन्तु तेन कथितं नाहं रासलीलासमनिन्दनीयकृत्यदर्शनं करोमि। देवदेवीभूमिकाग्रहणं लज्जास्पदमस्तीति। पंडितैरुत्तेजितः कर्णसिंहः ससैनिकः स्वामिनमागत्य कटुशब्दानभाषत। रासलीलामुद्दिश्य स्वामिना कृतं खण्डनात्मकमुपदेशं निशम्य कर्णसिंहस्य क्रोधः परां कष्टां प्राप्तः। कृपाकृपणकृपाणपाणिरसौ गालीदानपरायणो दयानन्दं हन्तुमभ्यद्रवत्। किन्तु चपलतया कर्णसिंहमुष्टेः खड्गमाकृष्य स्वामी तं द्विधाकरोत्। पश्चात्कर्णसिंहं हस्ते धृत्वा किं त्वां तव दुष्टताफलमास्वादयेयमिति दयानन्दवचनश्रवणेन कर्णसिंहवदनं प्रभातकालशशिशोभामबिभः। मूर्च्छापरवशोऽसौ न पारितवान् किंचिदपि वक्तुम्। ततः स्वामिना कथितं यदहं तु संन्यासी त्वदत्याचारविचारेण त्वदनिष्टसंपादनचिन्ताकुलं न मे मनः करिष्यामि। अपसर, प्रभुस्तुभ्यं सन्मतिं देयादितीच्छामि। एतां घटनां निरीक्ष्य सन्निहिताः सर्वे जनाः कर्णसिंहनिन्दापरा अभवन्। कर्णसिंहः स्वदुष्कृत्यफलमास्वादयितव्य इति कैश्चित्सूचना कृता। किन्तु दयानन्देन नकारो भणितः।

स्वामिदयानन्दः क्षमावतार इव, सहनशीलतालताजलद इव, प्रेमपयःपारावार इव नूनमासीत्।

एकदा प्रत्यूषे भ्रमणपरं स्वामिनमागत्य केनापि जनेनानेकविधानि दुर्वचनानि श्रावितानि। किन्तु स्वामी तु तदाऽलक्षित-

विकारो निजासनं स्वीकृतवान्। गालीदानपरो नरोऽसौ पुनरपि समीपमागतः। स्वामिना सादरं सुवचनेन सत्कृतोनिजागमनकारणं च पृष्टः। नम्रतामृतपूरार्द्रीभूतहृदय इव मधुराकृतिदर्शननष्टकोपान्धकार इव पादयोः पतित्वा क्षमां याचितवान्। स्वामिना कथितं यत्सर्वे शब्दा आकाशप्रभवास्तत्रैव लयमयन्ति। अतस्तव वचनानि नष्टानि तत्रैव। न मे मनसि दुःखलेशोऽपि विद्यते।

गंगामन्दिरपूजका गंगापुत्रा इति नाम्नाभिधीयन्ते। एतादृशः कोऽपि गंगापुत्रः कानपुरनगरे स्वामिनः कुटीराद्नातिदूरे वसति स्म। स तु सदा समापितप्रातःकालविधिः स्वामिने विविधा गालीरयच्छत्। किन्तु स्वामिना नैकोऽपि शब्दः श्रावितः।

संख्यातीता भक्ता विविधभोज्यपदार्थान् स्वामिने समर्पयन्ति स्म। एकदा मोदकाः कुटीरेऽवशिष्टा आसन्। कस्मा इमे देया इति विचारः समजनि स्वामिनो मनसि। किन्तु ते गालीदानपराय गंगापुत्राय पारितोषिकत्वेन कितीर्णाः। एवं सप्ताहेन चासौ जातखेदः स्वामिनं वन्दित्वावदद् यद् भवतां सुजनता मम दुर्जनतापराजयमकरोत्। तदनु साशीर्वादं स्वामिना त्वसौ विसर्जितः।

सकलभूमंडलप्रथिताखंडप्रतापां सरस्वतीसदनभूतां भूताधिनाथनिकेतनगौरवाकृष्टभक्तजनतां जनतापनिवारणदीक्षितगंगातरंगावृतपरिसराममरावतीतुलनां लभमानां पंडितमंडितां विद्याध्ययनागतविद्यार्थिवृन्दपठ्यमानसंस्कृतश्लोकगर्जितां जिताक्षयतिगणसेवितां सर्वप्रकाशिकां नासिकामिव भारतस्य विनाशितपातकराशिं नराशिवविचारहरां काशीनगरीं गत्वा स्वामी दयानन्द आनन्दवाटिकायां निवासमरचयत्। तदागमनवृत्तान्तप्राप्त्यनन्तरं प्रवरपंडिता अन्ये

च जनाः विविधप्रश्नपिपृच्छिषाप्रेरिताः स्वामिसमीपमागच्छन् । विवादा विविधविषयपराः समजायन्त । केचिदुपहासाशया केचित्स्वामिक्लेशवर्धनाय केचिद् विप्लवोत्पादनाय केचिच्च शुद्धाशापूरिता जिज्ञासुमत्याप्यायन् ।

मूर्तिपूजा वेदप्रतिपादिता वर्तते वा नेति विषयमपलभ्य काशीपुरीपंडितानां दयानन्दस्य च शास्त्रार्थो । भविष्यतीति निर्णयोऽकारि । अयं समाचारः काश्यां सर्वत्र प्रसृतः । सर्वेषां मनांस्युत्कण्ठितान्यभवन् । रात्रिंदिवं तद्गतचर्चापरा नरा अभूवन् शास्त्रार्थस्थानमानन्दवाटिकासीत् ।

कैश्चित्पापमतिभिरतिनीचैरुपद्रवकरणाय कपटप्रबन्धः कृत इति समाचारः केनापि बलदेवाभिधेन जनेन स्वामिने निवेदितः । ततो दयानन्देन तस्मै कथितं यद् बलदेव, मा स्म चिन्तावशं गाः । अविद्यातमोऽपहः सत्यभास्कर इति योगिनां हृदये श्रद्धा जागर्तितमाम् । कुतस्तस्य पक्षपातहीनस्य महोपदेशकस्य भयलेशोऽपि संभवेत् । सत्पुरुषो भयेन नैव सत्यं त्यजति । प्राणेभ्योऽपि सत्यं मम प्रियतरमस्ति । कुतो भयावकाश इति ब्रूहि ।

शास्त्रार्थदिने विविधशास्त्रविशारदाः शारदाभक्ता बालशास्त्रिशिवसहायताराचरणसमा असमाः पंडिताः प्रेक्षकाश्चान्ये सर्वत आगत्य संगता अभूवन् । शास्त्रार्थो दीर्घकालं यावदवर्तत । सायंसमये दयानन्दप्रखरज्ञानभानुनष्टतेजसः खद्योता इव सर्वे पंडिताः खंडिताभिमाना अभवन् । सनातनीयैस्ततो दयानन्दः पराजितः इति कोलाहलं कृत्वा दयानन्दस्योपरि पाषाणखण्डाः क्षिप्ताः । बहुभिर्गालीप्रदानमकारि । किन्तु दयानन्दस्तत्सर्वमसहत । द्वितीये दिने समाचारपत्रैरपि दयानन्दो विजयमलभतेति प्रगटीकृतः समाचारः ।

कर्णवासनगरं पुनरपि स्वामिना कृतमागमनम् । रावकर्ण-सिंहोऽपि पूर्णिमादिने स्नानार्थं भागीरथीतटमागतः । तेन सह मूर्तिमत्य इव दुर्दशाः कामकशा इव वशीकृतकामुकाश्वा धन-हरिणवागुरा इव रूपानलज्वालाहूतयौवनपतंगाः समाजविटपिलता-दहना गहनाज्ञानतिमिरवाप्य इव वेश्या अपि समागता आसन् । स्वामिनो निवासात्तदीयपटमण्डपो नातिदूर एवावर्तत । भूतपूर्व-वैरविशोधनमनसस्तस्य दुष्टताविषवृक्षोऽद्यापि न समूलमुन्मूलित आसीत् । अतस्तेन सदानन्यजन्यमहिम्ना विराजमानं दयानन्दं स्वामिनं घातयितुं त्रयो विकोशखड्गधरा नरा धरातलभारभूतेन कर्णसिंहेन मध्यरात्रे प्रेषिताः । तदा सर्वत्र गंभीरशान्तिसाम्राज्य-मासीत् । केवलं गङ्गा निजनीरस्खलनसंजातेन शब्देन कर्णसिंह-दुष्टतामवधीरयन्तीव, स्वामिवधसंपद्यमानदुःखविचारमात्रेण रुदन-परेव, दुष्टजनमुखदर्शनपरिहारकामनयेव सत्वरं वहन्ती शान्तिभंगम-करोत् । चन्द्रोऽपि कर्णसिंहपातकान्धकारचयस्यापि निशान्धकारेण सह नाशो भविष्यतीति शंकया गगनवेदिकां न शोभयतिस्म । वायुरपि गंगातरंगसंगशीतलो मन्दं मन्दं दयानन्दः शीतार्तो न भवेदिति विचारेण वाति स्म । दयानन्दस्तु तदा समाधिलग्नमना अवर्तत । कर्णसिंहकिंकराः स्वामिनमागत्य प्रहर्तुमक्षमा भृशतपोबलनिवारिता इव प्रतिनिवृत्ताः पुनरपि प्रेषिताः । स्वामिनैष वृत्तान्तो ज्ञातः । स्वामी तु किंचिदप्यकुर्वाणो हुंकारमकरोत्सोत्थानं तान् निरीक्ष्य । तत्क्षेणमेव तेषां हस्तेभ्यो बलेन धैर्येण च सह खड्गा भूमावपतन् । तदनु ते पलायन्त । स्वामिनः समीपस्थेन कैथलसिंहेन त्यक्तनिद्रेण गदितं यदन्यत्र गन्तव्यं क्षपां क्षपयितुं तेषां पुनरागमनशंकया । नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावक इति गीतावचनमगमत् स्वामिमुखात्तदा । मा व्याकुलीभव । प्रभुरस्माकं रक्षकः ।

आसीन्मे शक्तिस्तेषां मानवहतकानां हस्तात्खड्गानाकृष्य तैरेव तेषां जीवनलीलां समापयितुमिति वचनं कैथलसिंह प्रति स्वामिनाभाष्यत ।

उदयपुरमहाराजेन स्वामिदयानन्दायैकदाभ्यर्थना कृता यद् भवता मूर्तिपूजाखण्डनविषयस्त्याज्यः । एवं कृते भवन्तमहमेकलिंगमहादेवमन्दिराधिपपदव्या योजयिष्यामि । भवांश्च धनवान् भविष्यति राजगुरुपदं च लप्स्यते । एवंविधां प्रार्थनामुदयपुराधीशस्य श्रुत्वा स्वामिनाकथ्यत यत्तुच्छप्रलोभनेन भवान् मां परमात्मविमुखं कर्तुमीहते । तदाज्ञाभंगाय प्रेरणा भवता दीयते । किन्तु महाराज, भवतां स्वल्पं राज्यमनन्तेश्वरादेशभंगलोलुपं मां कर्तुं न समर्थमस्ति । परमात्मनि परमा प्रीतिर्मेरुभूमिराज्यादतिरिच्यते । मम वचने लक्ष्यसंख्या जना विश्वसन्ति । एतादृशवचनोच्चारणार्थं भवता न कदापि साहसमाचरणीयम् । मदीया निश्चला धर्मधारणा नैव चलिष्यति । एतन्निशम्योदयपुरमहाराजेन स्वामी क्षमामयाच्यत ।

जोधपुराधिपामंत्रणेन स्वामी दयानन्दस्तमगच्छदेकदा । दयानन्दं समागतं दृष्ट्वा नन्हीजाननामका निकटवर्तिनी वेश्या दूरीकृता महाराजजोधपुराधीशेन । इदं दृश्यं वीक्ष्य स्वामिनो हृदयं नितरां दुःखितमभवत् । वेश्यासक्ता बहवो जनाः कालपाशात् प्राणिन इव व्याधबन्धनान्मृगा इव स्वामिना मोचिताः । जोधपुरपतिमपि परमावेशवशंवदः सन् स्वामी कथयितुं प्राक्रमतैवम् । राजन्, राजानस्तु सिंहा गण्यन्ते । प्रतिस्थलमटन्त्यो वेश्यास्तु कुकुर्य एव सन्ति । वीरशार्दूलस्य कुकुर्यां प्रीतिरनुचिता वर्तते । विरुद्धमेतदार्यजातिकुलमर्यादायाः । केसरिणः कन्दरे कल्मषकलुषित-

कुक्कुरीणां कावश्यकता विद्यते । अनेन दुर्व्यसनेन धर्मकर्मभ्रष्टता जायते । मानमर्यादा कलंकिता भवति । अस्मिन् पापसोपाने पदं निधाय जनः केवलमवनतिं लभते । एतद् दुर्व्यसनं सत्वरं त्यज्यताम् ।

नन्हीजानवेश्यापि स्वामिकृतसदुपदेशवार्तां श्रुत्वा वृश्चिकदष्टेव रोगाविष्टेव, शल्यविद्धहरिणीव, सर्पभीतमूषिकेव समासन्नमरणेव नष्टमतिरनिशं कुतोऽपि शान्तिमलभमाना सर्पिणीव भयंकरकोपानलदह्यमाना निशाचरीव मधुमांसलोलुपा रावणमतिरिव दुरितकर्मकर्मठा नदीव नीचगामिनी स्वामिदयानन्दजीवितापहरणे मतिमकरोत् । यतो दयानन्देन तज्जीवनसुखलतायां कुठारायितम् । मानसरःशोषणे च निदाघायितम् ।

विक्रमसंवत्सरे १९४० तमे चतुर्दश्यामाश्विनमासस्य, रजनीसमये पाचकेन दत्तं वेश्याहृदयमिव विषमयं, क्षीरं स्वामी दयानन्दः पीत्वा निद्रामुद्रितलोचनोऽभवत् । अल्पेनैव समयेन संजाता विषकारणोत्थवेदना स्वामिनं जागृतमकरोत् । त्रिवेमनं कृतम् । अमावास्यादिने प्रभातकाले भ्रमणमपि त्यक्तमुदरपीडया । पुनरपि वमनं द्विरक्रियत । उदरे पीडा क्रमशो वृद्धिं गच्छति स्म । स्वामिना कर्मचारिभ्यो निवेदितं यदद्य मे जठरं महती वेदना वर्तते । तैर्वैद्यस्तत आहूतः । किन्तु सर्वे प्रयत्ना विफलतामयुः । स्वामिना स्वजीवनहरणकृतप्रयत्नो जगन्नाथनामा पाचको गृहीतः पृष्टश्च निजदुष्टपापाचारम् । जगन्नाथेन निजापराधः स्वीकृतः । दयालुर्दयानन्दो गंभीरभावपूर्वं तमवदद् यद् जगन्नाथ, मम मृत्युना सर्वथा मदीयं कार्यमपूर्णतामगमत् । त्वया न ज्ञातं यल्लोकस्य कीदृशी हानिरनेन तव कर्मणाक्रियत । विधातुरीदृशी वांछनान्यथा भवितुं नार्हति । जगन्नाथ, गृहाण रूपकानिमान् । परन्तु राठोड-

क्षत्रियाणां राज्यसीमानं परित्यज्य पलायस्व । नेपालराज्यं गत्वा प्रच्छन्नं स्थितः प्राणत्राणप्रवणो भविष्यसि । अत्र स्थितस्य विदित-पापकर्मणस्तव मरणं निश्चितमेवेति जानीहि । मा भूद् विलंबोऽधुना । अज्ञातं सत्वरं गम्यताम् माभूत्स्थालीपुलकन्यायेनापि ते कर्म कस्यापि विदितम् । मत्तो भयं मा शंकस्व । तव पापकर्मप्रकाशं नाहं करिष्ये ।

दयानन्दस्यास्वस्थप्रकृतेरयं समाचारः सर्वत्र प्रसृतः । बहवो मनुष्यास्त्यक्तान्यकार्याः श्रीदयानन्ददर्शनार्थमागच्छन् । तृतीयेऽहनि शिबिकाद्वारा स्वामी दयानन्द आबुगिरिमनीयत । विसर्जनसमये जोधपुराधीशः पादचार आगच्छत् । तदीयं हृदयं प्रबलानल-ज्वालाकुलोद्यानमिव, दिवाकरकरस्पर्शनिमीलितकुमुदमिव, दहन-पतितकुसुममिव, महिषावगाहनमलिनीकृतजलजलाशयमिव, दरिद्रतासंतापनष्टविचारतरङ्गकविजनांतरंगमिव शोकविषधरदष्टं निरानन्दमभवत् । स्वामिविसर्जनप्रसंगे द्रवीभूतहृदयं नयनजलमिषाद् बहिरागत्य तस्य कपोलतलयुगलं क्षालयति स्म । वाचापि भीतेव निरुद्धेव, दग्धेव, लज्जितेव वदनसदनान्नागच्छत् । आर्यत्ववाटिकां सदा ज्ञानामृतवृष्टिभिः प्रफुल्लां कुर्वन् पाखण्डतापशमनो वैदिक-धर्मकल्पलतालवालपूरणचणो दयानन्दमेघो निजराज्ये विकीर्णता-मगादिति जोधपुराधीशस्य महान् खेदः समजनि । दयानन्देन सुधाकिरा गिरा कथितं महाराजाय यद् राजन् मास्म चिन्ता-वशगं मनः कृथाः । देवविहितं भवत्येव । तदा दिनमणिरगणित-परितापतप्त इव नन्हीजाननीचताकुपित इव ताम्रवर्णः समजनि । तदनु स मृदुकरैर्जोधपुराधीशवदनादश्रूणि मार्जयन्निव, सकललोकं तिमिरमिषात् शोके पातयन्निव कमलिनीवृन्दमाश्वासयन्निव पश्चिम-दिशायां स्वहृदयदुःखानलेन गगनमपि रक्तां नयन्निव, पवनेन

सान्त्वनं नीयमान इव भक्तैर्वन्द्यमानोऽनिच्छन्नपि दयानन्दमुखदर्शनं परिहातुं विधिनियोगमनुवर्तमानोऽस्ताचलचूडाचुम्बनमकार्षीत् । निशापतिरपि नन्हीजानमुखानुकारित्वलज्जित इव दयानन्ददुःख-समाचारश्रवणसंजाततापनष्टतेजा इव निशामपि न भूषयति स्म। निशापि तिमिराम्बरधारिणी पतिदर्शनाभावेन भ्रान्तेव नष्टाशेव कामार्तेव पतिं मार्गयन्तीव भ्रमति स्म। गगनतलमपि तारकमिषेण शोकांगारज्वलितमिव विभाति स्म । तारकाण्यपि गगनांगणे-स्वर्गवासिमुक्ताश्रुबिन्दुवृन्दानीवाशोभन्त ।

आबुग्रामे लक्ष्मणो नामैकः कुशलो वैद्यराजः स्वामि-सपर्यापरायण आसीत्। तेन बहुविधाश्चिकित्साः कृता बहुवारमौषधि-परिवर्तनेन महर्षेः शरीरवेदनापहारप्रयत्नो व्यधायि च। अत्रान्तरं स वैद्योऽजमेरनगरस्थायिना स्वाधिकारिणाहूतः। वैद्यराजो लक्ष्मणः स्वामिदयानन्दास्वस्थप्रकृतिसमाचारं निजाधिकारिणे निवेदितवान् यथाबुग्रामत्यागः कर्तुं न शक्यते ततः कृपा कार्याजमेरप्रयाणविलम्ब-कृते। किन्त्वधिकारी कोपविधेयतामगमदनेन तं च सत्वरमजमेर-मागन्तुमाज्ञापयत्। लक्ष्मणो वैद्यराजः स्वामिदयानन्दस्नेहभरितो निजसेवात्यागपरंपत्रं निजाधिकारिणे प्रेषितवान् परं त्वन्ते लक्ष्मणस्य स्वाधिकारपरित्यागपत्रं न स्वीकृतमभूत्। तेन वैद्यराजो लक्ष्मणोऽ जमेरमगच्छदुद्बाष्पपक्ष्मा ।

सायंकालमिषेण मृत्युच्छाया प्रसरति स्म। स्वामिनः सकले देहे पिटिकाः प्रजाता आसन्। तेन वेदनाकुलेनापि नापितमाहूय शिरोमुंडनं कारितम्। नखच्छेदोऽपि तदनु कारितः। बद्धपद्मासनेन स्वामिना दयानन्देन तिथिवारपृच्छानुपदं शिष्ययुगाय यथार्हवस्तू-पहारं दत्त्वा च वेदमन्त्रपाठ आरब्धः। तदा स्वामिनः कंठे स्वरं

मंत्रोच्चारणे ध्वनौ च निर्बलताया लेशोऽपि नालक्ष्यत । मुखमंडलमपि निर्मलस्मितप्रभाभूषितं मेघापगमविशदकान्तिहिमकरलक्ष्मीमबिभः । नेत्रयुगलमपि तेजोरज्ज्वा समीपस्थभक्तहृदयानि बध्नाति स्म । असंजातव्याधिरिव वेदामृतपाननष्टवेदन इव, प्रभुस्मरणलीनो दयानन्दः सर्वैरलक्ष्यत । संस्कृतभाषायां प्रभुप्रार्थनां कृत्वा सावित्री-मंत्रजपपरायणतामगात् । ततो निवर्तितसमाधिर्दिव्यतेजोद्वारमिव नेत्रयुगलमुन्मील्य मधुरवाणीप्रवाहेणेव भक्तमनोगतशोकानलं शमयन्निव, प्रसन्नमुखच्छविना मोहतिमिरं दलयन्निव, विमलदन्त-प्रभया सह ज्ञानप्रकाशं विस्तारयन्निव दयानन्दोऽवदद् यथा भो दयामय, सर्वशक्तिमन् प्रभो नूनमियं तवेच्छास्ति । यत्सत्यमीदृशी ते वांछनास्ति । परमात्मन् भवतु सफला तवेच्छा । प्रभो तव लीला विचित्रास्ति । एवंविधानि वचनानि वदतः स्वामिदयानन्द-स्यात्मा दीपावलीदिने भारतजनताहृदयेषु शोकदीपान् प्रकटीकृत्य सच्चिदानन्दगोविन्दपदारविन्दयुगलगलदमन्दमकरन्दबिन्दुपानचंचरीको जातः ।

तदवसानसंतापज्वाला वारंवारं बहुजननयनजलधाराभिः शान्तिवचनामृतवर्षिभिर्विदुरमेघैः सिच्यमानापि न शान्तिमगमत् । वैदिकधर्मपताकादण्डः पाखण्डतमोदिवाकरो विज्ञानामृतजलनिधिः सत्यमार्गदीपो भारतमातृमौलिमंडनभूतः संन्यासिनामादर्शो निर्भयवाक्प्रसर आर्यसंस्कृतिगंगाभगीरथो दयानन्दो देवलोका-तिथितामगादिति सर्वेषां मनांसि शोकाकुलानि समजायन्त । तदीया कीर्तिरमरा सर्वेषामार्याणां हृदयेषु नवीनां चेतनकान्ति-मुत्पादयन्ती स्वामिमनोगतादर्शविधायिनी सर्वैरगीयत । किंबहुना ।

इति श्रीलोहाणाज्ञात्युत्पन्नेन भगवत्तनयेन वल्लभदासेन गणात्रोपनामकेन विरचितं महर्षिदयानन्दचरितं समाप्तम् ।